# श्रीयाज्ञवल्क्यकृत-श्रीसरस्वती-स्तोत्रम् :

१) ब्रह्मस्वरूपा परमा ज्योतीरूपा सनातनी ।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ॥

२) विसर्गबिन्दुमात्रासु यदधिष्ठानमेव च ।
तदधिष्ठात्री या देवी तस्यै नीत्यै नमो नमः ॥

३) व्याख्यास्वरूपा सा देवी व्याख्याधिष्ठातृ-रूपिणी ।
यया विना प्रसङ्ख्यावान् सङ्ख्यां कर्तुं न शक्यते ॥

४) कालसङ्ख्यास्वरूपा या तस्यै देव्यै नमो नमः ।
ब्रह्मसिद्धान्तरूपा या तस्यै देव्यै नमो नमः ॥

५) स्मृतिशक्ति-ज्ञानशक्ति-बुद्धि-शक्तिस्वरूपिणी ।
प्रतिभा कल्पनाशक्तिः या च तस्यै नमो नमः ॥

६) कृपां कुरु जगन्मातः मामेवं हततेजसम् ।
ज्ञानं देहि स्मृतिं विद्यां शक्तिं शिष्यप्रबोधिनीम् ॥

७) याज्ञवल्क्यकृतं वाणीस्तोत्रमेतत्तु यः पठेत् ।
स कवीन्द्रो महावाग्मी बृहस्पतिसमो भवेत् ।
स पण्डितश्च मेधावी सुकवीन्द्रो भवेत् ध्रुवं ॥

॥ महर्षिश्रीयाज्ञवल्क्यकृतं श्रीसरस्वतीस्तोत्रं सम्पूर्णम् ॥

( Source: Sri Sukla Yajurveda Kaanva Sakha
Sandhya-vandanam Book published by Sabha in 1981 )